"तां मानसीं मेरुसखः पितॄणां
कन्यां कुलस्य स्थितये स्थितिज्ञः ।
मेनां मुनीनामपि माननीया-
मात्मानुरूपां विधिनोपयेमे ॥"
इति कुमारसम्भवे । १ । १८ ॥ * ॥
यथा च, कौर्म्मे १२ अध्याये ।
"अग्निष्वात्ता बर्हिषदो द्विधा तेषां व्यवस्थितिः।
तेभ्यः स्वाहा स्वधा जज्ञे मेना वैतरणी तथा ॥"
( स्त्री । यथा, ऋग्वेदे । १ । ६२ । ७ ।
"भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदं-
साः ।"
"मेनेति स्त्रीनाम । मेने स्त्रीरूपमापन्ने रोदसी ।"
इति तद्भाष्ये सायणः ॥ * ॥ वृषणश्वकन्या ।
यथा, ऋग्वेदे । १ । ५१ । १३ ।
"मेना भवो वृषणश्वस्य ।"
"हे इन्द्र ! त्वं वृषणश्वस्य एतदाख्यस्य राज्ञो
मेना भवः मेनानाम कन्यका भूः ।" इति तद्भाष्ये
सायणः ॥ * ॥ वाक् । इति निघण्टुः । १ । ११ ॥
"मानपूजायां इत्यस्मात् 'बहुलमन्यत्रापि इनच्
भवति ।' इति वचनादिनच् । बहुलग्रहणात्
नलोपः । पूज्यतेऽनया गुर्व्वादिरुपदेशवाक्येन
पूज्या वा देवतात्वात् ।" इति तट्टीकायां देव-
राजयज्वा । * । नदीविशेषः । यथा, महा-
भारते । ६ । ९ । २३ ।
"कारिषिणीमसिक्नीञ्च कुशचीरां महानदीम् ।
मरुद्वीं प्रवरां मेनां हेमां घृतवतीं तथा ॥" )
मेनाजा, स्त्री, (मेनायाः जायते इति । जन् + डः ।
स्त्रियां टाप् । ) पार्व्वती । इति हेमचन्द्रः ॥
मेनादः, पुं, ( मे इति नादोऽस्य । ) विडालः ।
छागः । मयूरः । इति मेदिनी । दे, ३९ ॥
मेनाधवः, पुं, (मेनाया धवः स्वामी ।) हिमालयः ।
इति त्रिकाण्डशेषः ॥
मेन्धिका, स्त्री, (मां शोभामिन्धयति प्रकाशयतीति ।
इन्ध + णिच् + ण्वुल् । टापि अत इत्वम् । )
क्षुपविशेषः । इति केचित् । मेहदी इति
भाषा ॥
मेन्धी, स्त्री, ( मां शोभामिन्धयतीति । इन्ध +
णिच् + अच् । गौरादित्वात् ङीष् ।) क्षुप-
विशेषः । इति केचित् । मेहदी इति भाषा ॥
मेप, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-
आत्म०-सक०-सेट् । ) ङ, मेपते । ऋ, अमि-
मेपत् । इति दुर्गादासः ॥
मेरकः, पुं, विष्णुशत्रुभेदः । इति हेमचन्द्रः ॥
मेरुः, पुं, ( मि + "मिपीभ्यां रुः ।" उणा० ४ ।
१०१ । इति रुः । ) पर्व्वतविशेषः । तत्पर्य्यायः ।
सुमेरुः २ हेमाद्रिः ३ रत्नसानुः ४ सुरा-
लयः ५ । इत्यमरः ॥ मिनोति क्षिपति ज्योतींषि
उच्चत्वात् मेरुः । डुमि ञ् क्षेपे नाम्नीति
रुः । इति भरतः ॥ * ॥ (यथा, मात्स्ये ।१२१।८।
"देवर्षिगन्धर्व्वयुतः प्रथमो मेरुरुच्यते ।
प्रागायतः सौवर्ण उदयो नाम पर्व्वतः ॥")
जपमालायाम्वर्त्तिन्येका माला । यथा,—
"मालामेकैकमादाय सूत्रे सम्पातयेत् सुधीः ।
मुखे मुखन्तु संयोज्य पुच्छे पुच्छन्तु योजयेत् ॥
गोपुच्छसदृशी कार्य्याथवा सर्पाकृतिर्भवेत् ।
तत्सजातीयमेकाक्षं मेरुत्वेनाग्रतो न्यसेत् ॥"
इत्युत्पत्तितन्त्रे ६० पटलः ॥ * ॥
करमालायां मेरुर्यथा,—
"तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका ।
पर्व्वद्वयं मध्यमाया मेरुत्वे नोपकल्पयेत् ॥"
इदन्तु शक्तिभिन्नविषयम् ॥ * ॥
शक्तिविषये मेरुर्यथा,—
"पर्व्वद्वयमनामायाः परिवर्त्तेन वै क्रमात् ।
पर्व्वत्रयं मध्यमायास्तर्ज्जन्येकं समाहरेत् ।
पर्व्वद्वयन्तु तर्ज्जन्या मेरुं तद्विद्धि पार्व्वति ! ॥"
श्रीविद्याविषये मेरुर्यथा,—
"अनामामध्यमायाश्च मूलाग्रन्तु द्वयं द्वयम् ।
कनिष्ठायाश्च तर्ज्जन्याश्चयं पर्व्व सुरेश्वरि ! ।
अनामामध्यमायाश्च मेरुः स्याद्दितयं शुभम् ॥"
तल्लङ्घितजपे दोषो यथा,—
"अङ्गुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलङ्घने ।
पर्व्वसन्धिषु यज्जप्तं तत् सर्व्वं निष्फलं भवेत् ॥"
इति तन्त्रसारः ॥
मेरुकः, पुं, (मिनोति क्षिपति गन्धानिति । मि +
रुः । संज्ञायां कन् । ) यक्षधूपः । इति शब्द-
चन्द्रिका ॥ धुना इति भाषा । ( मध्यदेशस्य
प्रदेशभेदः । यथा, बृहत्संहितायाम् ।१४।२९।
"ऐशान्यां मेरुकनष्टराज्यपशुपालकीरकाश्मी-
राः ।
अभिसारदरदतङ्गणकुलूतसैरिन्ध्रवनराष्ट्राः ॥")
मेरुसावर्णः, पुं, एकादशमनुः । यथा,—
"ततस्तु मेरुसावर्णो ब्रह्मसूनुर्मनुः स्मृतः ।
ऋतुश्च ऋतुधामा च विष्वक्सेनो मनुस्तथा ॥"
इति मात्स्ये ९ अध्यायः ॥
मेलकः, पुं, ( मिल् + भावे घञ् । स्वार्थे कन् । )
सङ्गः । इत्यमरः । ३ । २ । २९ ॥ ("बहुमान्य-
मेलके बलाबलमुक्तम् ।" इति । २ । १३६ ।
मनुटीकायां कुल्लूकभट्टः ॥ )
मेलकलवणं, क्ली, ( मिलतीति । मिल + ण्वुल् ।)
मेलकं लवणम् । ) सौवर्चलवणम् । इति राज-
निर्घण्टः ॥
मेला, स्त्री, ( मिल् + णिच् + अङ् । टाप् । )
मेलकः । मषिः । इति मेदिनी । ले, ४६ ॥
अञ्जनम् । इति हेमचन्द्रः ॥ महानीली । इति
राजनिर्घण्टः ॥
मेलानन्दा, स्त्री, (मेलया मस्या आनन्दो यस्याः ।)
मस्याधारः । इति हारावली ॥
मेलान्धुः, स्त्री, ( मेलानां अन्धुः कूपिका ।) मस्या-
धारः । इति जटाधरः ॥
मेलाम्बुः, पुं, ( मेलेव अम्बु अत्र । ) मस्याधारः ।
इति शब्दरत्नावली ॥
मेव, ऋ ङ सेवने । इति कविकल्पद्रुमः ॥ ( भ्वा०-
आत्म०-सक०-सेट् । ) ऋ, अमिमेवत् । ङ,
मेवते । इति दुर्गादासः ॥
मेषः, पुं, ( मिषति अन्योन्यं स्पर्द्धते इति । मिष्
स्पर्द्धायाम् + अच् । ) पशुविशेषः । मेड़ा इति
भेड़ा इति च भाषा ॥ (यथा, पञ्चतन्त्रे ।५।६१।
"मेषैश्च सूपकाराणां कलहो यत्र वर्त्तते ।
स भविष्यत्यसन्दिग्धं वानराणां भयावहः ॥")
तत्पर्य्यायः । मेढ्रः २ उरभ्रः ३ उरणः ४
ऊर्णायुः ५ वृष्णिः ६ एड़कः ७ । इत्यमरः ।२।
९ । ७६ ॥ भेड़ः ८ हुड़ः ९ मद्गिणः १०
अविः ११ लोमशः १२ बली १३ रोमशः १४
भेडुः १५ भेड़कः १६ मेण्ढः १७ हुडुः १८ ।
इति शब्दरत्नावली ॥ मेण्ढकः १९ हुड़ः २०
संफलः २१ । इति हेमचन्द्रः । ४ । ३४१ ॥
अस्य मांसगुणाः । मधुरत्वम् । शीतत्वम् ।
गुरुत्वम् । विष्टम्भित्वम् । बृंहणत्वञ्च । इति
राजनिर्घण्टः ॥ अपि च । पित्तश्लेष्मकरत्वम् ।
कुसुम्भशाकेन सह त्याज्यत्वञ्च । इति राज-
वल्लभः ॥ * ॥ लग्नविशेषः । औषधविशेषः ।
इति मेदिनी । षे, १२१ ॥ ( यथा, सुश्रुते
उत्तरतन्त्रे । १७ अध्याये ।
"मेषस्य पुष्पैर्मधुकेन संयुतं
तदञ्जनं सर्व्वकृते प्रयोजयेत् ।
क्रियाश्च सर्व्वाः सतजोद्भवे हिताः
क्रमः परिम्लायिनि चापि पित्तहृत् ॥")
राशिविशेषः ॥ तत्पर्य्यायः । क्रियः २ । (यथा,
श्रीमद्भागवते ।५।२१।४। "यदा मेषतुलयोर्वर्त्तते
तदाहोरात्राणि समानानि भवन्ति । यदा
वृषभादिषु पञ्चसु च राशिषु चरति तदाहा-
न्येव वर्द्धन्ते ह्रसति च मासि मासि एकैका
घटिका रात्रिषु ॥" ) अस्याधिष्ठात्री देवता
पुंमेषः । अश्विनीभरणीकृत्तिकापादैकेन मेष-
राशिर्भवति । अत्र जात ईदृशो भवति ।
शेषदशायां नेत्रदुःखी दयालुः धनी गानसुखी
धार्म्मिकः धीरः मत्स्यमांसाशी च । स तु
पृष्ठोदयः । अस्य वर्णः । आरक्तः पीतश्च ।
अयं क्रूरः । पित्तोष्णस्वभावः । कान्तिरहितः ।
समानाङ्गः । पर्व्वतचारी । पूर्व्वदिगधिपतिः ।
वैश्यवर्णः । अल्पस्त्रीसङ्गः । अल्पसन्तानः ।
सुदृढ़ः । अतिरवश्च । इति ज्योतिषम् ॥ * ॥
रव्याश्रिततद्राशिजातफलं यथा,—
"मेषे दिनेशे पुरुषः सुवेशः
सत्साहसः स्यान्नृपतेः समानः ।
कुद्ध्या युतः पित्तकृता च पीड़ा
चक्रोद्भवा वा सततं महौजाः ॥" * ॥
चन्द्राश्रिततद्राशिजातफलं यथा,—
"स्थिरजनो रहितः स्वजनैर्नरः
सुतयुतः प्रमदाविजितो भवेत् ।
अजगते द्विजराज इतीरितं
विभुतयाद्भुतया सहितः श्रिया ॥" * ।
तल्लग्नजातफलं यथा,—
"मेषलग्ने समुत्पन्नश्चण्डो मानी धनी शुभः ।
क्रोधी स्वजनहन्ता च विक्रमी परवत्सलः ॥"
इति कोष्ठीप्रदीपः ॥